श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ पञ्चदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चदशः सर्गः ॥

ऋष्यशृङ्गेण राज्ञो दशरथस्य पुत्रेष्टियज्ञस्यारम्भो देवानां प्रार्थनया ब्रह्मणा रावणवधोपायस्यानुसन्धानं भगवता विष्णुना देवानामाश्वासनम्

मेधावी तु ततो ध्यात्वा स किञ्चिदिदमुत्तरम्।
लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत्॥ **1.15.1** ॥

इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात्।
अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः॥ **1.15.2** ॥

ततः प्राक्रमदिष्टिं तां पुत्रीयां पुत्रकारणात्।
जुहावाग्नौ च तेजस्वी मन्त्रदृष्टेन कर्मणा॥ **1.15.3** ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
भागप्रतिग्रहार्थं वै समवेता यथाविधि॥ **1.15.4** ॥

ताः समेत्य यथान्यायं तस्मिन् सदसि देवताः।
अब्रुवन् लोककर्तारं ब्रह्माणं वचनं ततः॥ **1.15.5** ॥

भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः।
सर्वान् नो बाधते वीर्याच्छासितुं तं न शक्नुमः॥ **1.15.6** ॥

त्वया तस्मै वरो दत्तः प्रीतेन भगवंस्तदा।
मानयन्तश्च तं नित्यं सर्वं तस्य क्षमामहे॥ **1.15.7** ॥

उद्वेजयति लोकांस्त्रीनुच्छ्रितान् द्वेष्टि दुर्मतिः।
शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति॥ **1.15.8**॥

ऋषीन् यक्षान् सगन्धर्वान् ब्राह्मणानसुरांस्तथा।
अतिक्रामति दुर्धर्षो वरदानेन मोहितः॥ **1.15.9**॥

नैनं सूर्यः प्रतपति पार्श्वे वाति न मारुतः।
चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कम्पते॥ **1.15.10**॥

तन्महन्नो भयं तस्माद् राक्षसाद् घोरदर्शनात्।
वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि॥ **1.15.11**॥

एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत्।
हन्तायं विदितस्तस्य वधोपायो दुरात्मनः॥ **1.15.12**॥

तेन गन्धर्वयक्षाणां देवतानां च रक्षसाम्।
अवध्योऽस्मीति वागुक्ता तथेत्युक्तं च तन्मया॥ **1.15.13**॥

नाकीर्तयदवज्ञानात् तद् रक्षो मानुषांस्तदा।
तस्मात् स मानुषाद् वध्यो मृत्युर्नान्योऽस्य विद्यते॥ **1.15.14**॥

एतच्छ्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतम्।
देवा महर्षयः सर्वे प्रहृष्टास्तेऽभवंस्तदा॥ **1.15.15**॥

एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः।
शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः॥ **1.15.16**॥

वैनतेयं समारुह्य भास्करस्तोयदं यथा।
तप्तहाटककेयूरो वन्द्यमानः सुरोत्तमैः॥ **1.15.17**॥

ब्रह्मणा च समागत्य तत्र तस्थौ समाहितः।
तमब्रुवन् सुराः सर्वे समभिष्टूय सन्नताः॥ **1.15.18**॥

त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया।
राज्ञो दशरथस्य त्वमयोध्याधिपतेर्विभो॥ **1.15.19** ॥

धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः।
अस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च॥ **1.15.20** ॥

विष्णो पुत्रत्वमागच्छ कृत्वाऽऽत्मानं चतुर्विधम्।
तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम्॥ **1.15.21** ॥

अवध्यं दैवतैर्विष्णो समरे जहि रावणम्।
स हि देवान् सगन्धर्वान् सिद्धांश्च ऋषिसत्तमान्॥ **1.15.22** ॥

राक्षसो रावणो मूर्खो वीर्योद्रेकेण बाधते।
ऋषयश्च ततस्तेन गन्धर्वाप्सरसस्तथा॥ **1.15.23** ॥

क्रीडन्तो नन्दनवने रौद्रेण विनिपातिताः।
वधार्थं वयमायातास्तस्य वै मुनिभिः सह॥ **1.15.24** ॥

सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः।
त्वं गतिः परमा देव सर्वेषां नः परन्तप॥ **1.15.25** ॥

वधाय देवशत्रूणां नृणां लोके मनः कुरु।
एवं स्तुतस्तु देवेशो विष्णुस्त्रिदशपुङ्गवः॥ **1.15.26** ॥

पितामहपुरोगांस्तान् सर्वलोकनमस्कृतः।
अब्रवीत् त्रिदशान् सर्वान् समेतान् धर्मसंहितान्॥ **1.15.27** ॥

भयं त्यजत भद्रं वो हितार्थं युधि रावणम्।
सपुत्रपौत्रं सामात्यं समन्त्रिज्ञातिबान्धवम्॥ **1.15.28** ॥

हत्वा क्रूरं दुराधर्षं देवर्षीणां भयावहम्।
दशवर्षसहस्राणि दशवर्षशतानि च॥ **1.15.29** ॥

वत्स्यामि मानुषे लोके पालयन् पृथिवीमिमाम्।
एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान्॥ **1.15.30** ॥

मानुष्ये चिन्तयामास जन्मभूमिमथात्मनः।
ततः पद्मपलाशाक्षः कृत्वाऽऽत्मानं चतुर्विधम्॥ **1.15.31** ॥

पितरं रोचयामास तदा दशरथं नृपम्।
ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः।
स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम्॥ **1.15.32** ॥

तमुद्धतं रावणमुग्रतेजसं
प्रवृद्धदर्पं त्रिदशेश्वरद्विषम्।
विरावणं साधुतपस्विकण्टकं
तपस्विनामुद्धर तं भयावहम्॥ **1.15.33** ॥

तमेव हत्वा सबलं सबान्धवं
विरावणं रावणमुग्रपौरुषम्।
स्वर्लोकमागच्छ गतज्वरश्चिरं
सुरेन्द्रगुप्तं गतदोषकल्मषम्॥ **1.15.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चदशः सर्गः॥